अध्याय 10: अन्योक्तयः

विषय-सूची

1 प्रश्नावली · 7 प्रश्न

प्रश्नावली प्रश्न-अभ्यासः प्रश्न-अभ्यासः (पृष्ठ 103-105) 7 प्रश्न

प्रश्नावली प्रश्न-अभ्यासः — प्रश्न-अभ्यासः (पृष्ठ 103-105)

प्रश्न 1

एकपदेन उत्तरं लिखत — (क) कस्य शोभा एकेन राजहंसेन भवति? (ख) सरसः तीरे के वसन्ति? (ग) कः पिपासितः म्रियते? (घ) के रसालमुकुलानि समाश्रयन्ते? (ङ) अम्भोदाः कुत्र सन्ति?

हल

एकपदेन (एक शब्द में) उत्तराणि अधोलिखितानि सन्ति।

उत्तर: (क) सरोवरस्य/सरसः (ख) बकाः (ग) चातकः (घ) भृङ्गाः (ङ) गगने

प्रश्न 2

अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत — (क) सरसः शोभा केन भवति? (ख) चातकः किमर्थं मानी कथ्यते? (ग) मीनः कदा दीनां गतिं प्राप्नोति? (घ) कानि पूरयित्वा जलदः रिक्तः भवति? (ङ) वृष्टिभिः वसुधां के आर्द्रयन्ति?

हल

प्रश्नानाम् उत्तराणि संस्कृतभाषया वाक्येषु अधोलिखितानि सन्ति।

उत्तर: (क) सरसः शोभा राजहंसेन भवति। (ख) पिपासितः चातकः, पुरन्तरं जलं याचते म्रियते वा। अतः चातकः मानी कथ्यते। (ग) सरोवरस्य सङ्कोचम् अञ्चति मीनः दीनां गतिं प्राप्नोति। (घ) नानानदीनदशतानि पूरयित्वा जलदः रिक्तः भवति। (ङ) वृष्टिभिः वसुधां अम्भोदाः आर्द्रयन्ति।

प्रश्न 3

अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत — (क) मालाकारः तोयैः तरोः पुष्टिं करोति। (ख) भृङ्गाः रसालमुकुलानि समाश्रयन्ते। (ग) पतङ्गाः अम्बरपथम् आपेदिरे। (घ) जलदः नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति। (ङ) चातकः वने वसति।

हल

रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणम् अधोलिखितम् अस्ति।

उत्तर: (क) मालाकारः कैः तरोः पुष्टिं करोति? (ख) भृङ्गाः कानि समाश्रयन्ते? (ग) के अम्बरपथम् आपेदिरे? (घ) कः नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति? (ङ) चातकः कुत्र वसति?

प्रश्न 4

अधोलिखितयोः श्लोकयोः भावार्थं स्वीकृतभाषया लिखत — (अ) तोयैरल्पैरपि ..... वारिदेन। (आ) रे रे चातक ..... दीनं वचः।

हल

श्लोकयोः भावार्थः रिक्तस्थानपूर्त्या सह अधोलिखितः।

उत्तर: (अ) भावार्थ:- धाराप्रवाहं जलं वर्षयता (i) वर्षाकालिकेन जलदेन वृक्षाः पादपाः च तादृशाः (ii) तृप्ताः/सन्तुष्टाः न भवन्ति। यथा (iii) ग्रीष्म(काले) मालाकारेण दत्तं अल्पमपि जलं वृक्षान् पोषयति। इत्येवं आवश्यकतायां विपत्तौ वा अत्यल्पं (iv) सहायम् अपि महत्त्वपूर्णं वर्तते। (आ) भावार्थ:- मेघस्य जलबिन्दवैः एव तृप्तं (i) चातकं कविः कथयति यत् (ii) आकाशे बहवः मेघाः सन्ति परम् सर्वे न वर्षन्ति। केचित् वृथा गर्जन्ति। जलपूर्णाः मेघाः एव वर्षित्वा (iii) पृथ्वीम् आर्द्रयन्ति। अतः त्वम् यस्य कस्यापि अग्रे (iv) दीनवचनानि मा ब्रूहि।

प्रश्न 5

अधोलिखितयोः श्लोकयोः अन्वयं लिखत — (अ) आपेदिरे ..... कतमां गतिमभ्युपैति। (आ) आश्वास्य ..... सैव तवोत्तमा श्रीः॥

हल

श्लोकयोः अन्वयः (पदक्रमः) अधोलिखितः।

उत्तर: (अ) पतङ्गाः परितः अम्बरपथम् आपेदिरे, भृङ्गाः रसालमुकुलानि समाश्रयन्ते। सरः त्वयि सङ्कोचम् अञ्चति, हन्त दीनदीनः मीनः तु कतमां गतिम् अभ्युपैति। (आ) तपनोष्णतप्तम् पर्वतकुलम् आश्वास्य उद्दामदाववविधुराणि काननानि च नानानदीनदशतानि पूरयित्वा च हे जलद! यत् रिक्तः असि तव सा एव उत्तमा श्रीः।

प्रश्न 6

उदाहरणमनुसृत्य सन्धिं/सन्धिविच्छेदं वा कुरुत।

हल

(i) यथा — अन्य + उक्तयः = अन्योक्तयः
(क) निपीतानि + अम्बूनि = निपीतान्यम्बूनि
(ख) कृत + उपकारः = कृतोपकारः
(ग) तपन + उष्णतप्तम् = तपनोष्णतप्तम्
(घ) तव + उत्तमा = तवोत्तमा
(ङ) न + एतादृशाः = नैतादृशाः

(ii) यथा — पिपासितः + अपि = पिपासितोऽपि
(क) कः + अपि = कोऽपि
(ख) रिक्तः + असि = रिक्तोऽसि
(ग) मीनः + अयम् = मीनोऽयम्
(घ) सर्वे + अपि = सर्वेऽपि

(iii) यथा — सरसः + भवेत् = सरसो भवेत्

(क) खगः + मानी = खगो मानी

(ख) मीनः + नु = मीनो नु

(ग) पिपासितः + वा = पिपासितो वा

(घ) पुरतः + मा = पुरतो मा

(iv) यथा — मुनिः + अपि = मुनिरपि

(क) तोयैः + अल्पैः = तोयैरल्पैः

(ख) अल्पैः + अपि = अल्पैरपि

(ग) तरोः + अपि = तरोरपि

(घ) वृष्टिभिः + आर्द्रयन्ति = वृष्टिभिरार्द्रयन्ति

उत्तर: (i) निपीतानि + अम्बूनि, कृत + उपकारः, तपन + उष्णतप्तम्, तवोत्तमा, नैतादृशाः; (ii) कः + अपि, रिक्तः + असि, मीनोऽयम्, सर्वेऽपि; (iii) खगो मानी, मीनः + नु, पिपासितो वा, पुरतः + मा; (iv) तोयैरल्पैः, अल्पैः + अपि, तरोरपि, वृष्टिभिः + आर्द्रयन्ति।

प्रश्न 7

उदाहरणमनुसृत्य अधोलिखितैः विग्रहपदैः समस्तपदानि रचयत — यथा— पीतं च तत् पङ्कजम् = पीतपङ्कजम् (क) राजा च असौ हंसः = ... (ख) भीमः च असौ भानुः = ... (ग) अम्बरम् एव पन्थाः = ... (घ) उत्तमा च इयम् श्रीः = ... (ङ) सावधानं च तत् मनः, तेन = ...

हल

विग्रहपदेभ्यः समस्तपदानि अधोलिखितानि।

उत्तर: (क) राजहंसः (ख) भीमभानुः (ग) अम्बरपन्थाः (घ) उत्तमश्रीः (ङ) सावधानमनसा